# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| | | |
|---|---|---|
| कक्षा –आचार्यद्वितीयवर्षम् (सत्रम्-३) | प्रश्नपत्रम् – २ | गुणाः – ७० |
| विषयः – पौरोहित्यम् । | (C.C.- ५.३.७. New) | समयः –३.०० तः ६.०० |
| दिनाङ्कः – १०/१०/२०१९ | सन्दर्भग्रन्थः –कर्मकाण्डप्रदीपः । (दशकर्मपद्धतिः) | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितश्लोकयोः कस्याप्येकस्य श्लोकस्य ससन्दर्भं व्याख्या कार्या ।** **०५**

(१) नित्ये नैमित्तिके वापि कर्मोपक्रमणे द्विजः ।
धृतं पवित्रं कर्मान्ते ग्रन्थिं कृत्वा तु तत्त्वजेदिति ॥

(२) सदोपवीतिना भाव्यं सदा बद्धशिखेत् च ।
विशिखो व्युपवीतिश्च यत्करोति न तत्कृतमिति ॥

**प्रश्नः २ निम्नलिखितयोः कस्यारप्येकस्य सविस्तरेणोत्तरं यच्छत ।** **१०**

(१) उपवीतित्वबद्धशिखत्वविचारान् प्रदर्श्य शिखाबन्धनविचारान् यथाग्रन्थं वर्णयत ।

(२) आसनविचारान् विवर्ण्य आचमनविचारान् ऋषिछंददेवताविचारान् यथाग्रन्थं लिखत

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितश्लोकयोः कस्याप्येकस्य श्लोकस्य ससन्दर्भं व्याख्या कार्या ।** **०५**

(१) यदा कदाचित् विदिते न पुष्ये स्पशेत् भाण्डादि च यातु न
स्पृष्टं त्यजेत्सा तु शुचिस्त्रिशत्रात् ॥

(२) निन्द्यर्क्षतिथिवारेषु यदि पुष्पं प्रदश्यते ।
तत्र शान्तिं प्रकुर्वीत ग्रहयज्ञपुरःसरमिति ॥

**प्रश्नः ४ अधोलिखितप्रश्नयोः प्रश्नमेकं सविस्तरं वर्णयत ।** **१०**

(१) रजस्वलाशुद्धिविचारान् विवर्ण्य आटुतिचक्रसहितं ग्रहमस्वस्यावश्यकताविषये यथाग्रन्थं वर्णयत ।

(२) प्रतिमाप्राणप्रतिष्ठा विधिं विलिख्य कुशकण्डिका निर्णयः यथाग्रन्थं वर्णयत ।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितश्लोकयोः कस्याप्येकस्य श्लोकस्य ससन्दर्भं व्याख्या कार्या ।** **०५**

(१) तिस्रोमुद्रास्तुसंप्रोक्तामृगीहंसी च सूकरी ।
सूकरीकरसंकोचात् हंसीमुक्तकनिष्ठिका ॥

(२) द्वितीये वा तृतीये वा मासि पुंसवनं भवेत् ।
व्यक्तेगर्भे भवेत्कार्यं सीमन्तेन सदाथवा ॥

**प्रश्नः ६ अधोलिखितप्रश्नयोः प्रश्नमेकं सविस्तरं वर्णयत ।** **१०**

(१) यज्ञोपवीतविधिं विवर्ण्य ब्रह्मचारीधर्याः यथागन्थं वर्णयत ।

(२) वेदारम्भनिर्णयादारभ्य केशान्तसमावर्तनसंस्कारः यथाग्रन्थं वर्णयत ।

## चतुर्थान्विति:

**प्रश्न: ७ अधोलिखितश्लोकयो: कस्याप्येकस्य श्लोकस्य ससन्दर्भं व्याख्या कार्या । ०५**

(१) कुलं च शीलं च बपुववश्च वित्तं च विद्यां च सनातनां च ।
एतान्गुणान् रूपी परीक्ष्य देया कन्या बुधै शेषमचिन्तनीयम् ॥

(२) अनाश्रमी न तिष्ठेत् दिनमेकमपि द्विज: ।
आश्रमेण विना तिष्ठन्प्रायश्चितीयते यत ॥

**प्रश्न: ८ अधोलिखितप्रश्नयो: प्रश्नमेकं सविस्तरं वर्णयत । १०**

(१) विवाहविचारान् विवर्ण्य यथा ग्रन्थं विवाहप्रयोगं वर्णयत ।

(२) वैधव्यहरणविष्णुमूर्तिदानपुरस्सरम् अर्कविवाहविधिं । यथाग्रन्थं वर्णयत ।

## संयुक्तान्विति:

**प्रश्न: ९ एकेन वाक्येनोत्तरं यच्छत । १०**

(१) कर्मकाण्डप्रदीपगन्थस्य क: रचयिता ?

(२) शुचि: शब्दस्य क: अर्थ: ?

(३) कस्मिन् प्रयोगे प्रतिनिधिर्नास्ति ?

(४) दैवे पित्रे च कर्मणि केन अधिकारी भवति ?

(५) कं मन्त्रोच्चारणं कृत्वा प्राणायाम: कर्तव्य: ?

(६) अर्घ्यस्य अष्टाङ्गानि कानि सन्ति ?

(७) उपांशुजपलक्षणं किम् ?

(८) मृगीमुद्रालक्षणं किम् ?

(९) धनिन: कर्मणि वित्तसांठ्यं कुर्वन्ति, तदा किं फलम् ?

(१०) विवाहे कोनामाऽग्नि: स्थापितो भवति ?

(११) अभिचारकर्मणि कोऽनामाग्नि: पूजितो भवति ?

(१२) गर्भादानादि संस्कारे कति ब्राह्मणा: भोजनीया: ?

(१३) स्त्रिणां संस्कार: कर्णवेधादि कथं करणीया ?

(१४) रजस्वलाशुद्धि: कस्मिन् दिने भवति ?

(१५) नान्दीश्राद्धे कौ द्वौ विश्वेदेवौ ?

----oooo----